धारणाध्यानसमाधित्रयस्यैकत्र संयमः एकविषयाणि त्रीणि साधनानि संयम इत्युच्यते तदस्य त्रयस्य तान्त्रिकी परिभाषा संयमः इति” भा०।

**सर** न० सरति सृ-अच्। १सरोवरे शब्दच०। २जले जटा०। ३लवणे ४वाणे च हेमच०। ५दध्यग्रे दधिमस्तौ रत्नमा०। ६तज्जाते नवनीते च। भावे अच्। ७भेदने ८गमने च। कर्त्तरि अच्। ९सारके १०भेदके राजनि०।

**सरक** पु०न० सृ-वुन्। १मद्यपानपात्रे भरतः २मद्यपरिवेशने ३इक्षुजमद्ये ४तत्पात्रे ५अविरलपथिकपङ्क्तौ च मेदि० ६गतिशीले त्रि० शब्दर०। [कायाम् अमरः।

**सरघा** स्त्री सरं मद्यभेदं हन्ति हन-ड नि०। मधुमक्षि-

**सरङ्ग** पु स्त्री० सृ-अङ्गच्। १चतुष्पाज्जन्तौ २खगे च संक्षिप्तसा० स्त्रियां ङीष्।

**सरज** न० सरात् जायते जन-ड। नवनीते हारा०।

**सरजस्** स्त्री सह रजसा सहस्य सः। १ऋतुमत्यां स्त्रियाम् २रजोयुक्ते त्रि०। अव्ययी० अच् समा०। सरजस ३रजःसाहित्ये अव्य० अमरः।

**सरट** पुंस्त्री० सृ-अटन्। कृकलासे ( काँकलास ) अमरः। स्त्रियां ङीष्। देहे तत्प्ररोहणादिफलं यथा “वस्त्राः प्रपाते च फलं सरटस्य प्ररोहणे। शीर्षे राजश्रियोऽवाप्तिर्भाले चैश्वर्य्यमेव च। कर्णयोर्भूषणावाप्तिर्नेत्रयोर्बन्धुदर्शनम्। नासिकायाञ्च सौगन्ध्यं वक्त्रे मिष्टान्नभोजनम्। कण्ठे चैव श्रियोऽवाप्तिर्भुजयोर्विभवो भवेत्। धनलाभो बाहुमूले करयोर्धनसञ्चयः। स्तनमूले च सौभाग्यं हृदि सौख्यविवर्द्धनम्। पृष्ठे नित्यं महीलाभः पार्श्वयोर्बन्धुदर्शनम्। कटिद्वये वस्त्रलाभो गुह्ये स्त्र्युसमागमः। जङ्घे चार्थक्षयो नित्यं गुदे रोगभयं भवेत्। ऊर्वोश्च वाहनावाप्तिर्जानुजङ्घेऽर्थसञ्चयः। वामदक्षिणयोः पदोर्भ्रमणं नियतं भवेत्। वस्त्राः प्ररोहणे चैव पतने सरटस्य च। व्यत्यासाच्च फलं चैव तद्वदेवं प्रजायते। वस्त्राः प्ररोहणं रात्रौ सरटस्य प्रपातनम्। निधनायैव भवति व्याधिपीड़ाविपर्य्ययौ। पतनानन्तरं चैवारोहणं यदि जायते। पतने फलमुत्सृज्य रोहणेऽन्यत् फलं भवेत्। आरोहणस्योर्द्ध्ववक्त्रे अधोवक्त्रे च पातनम्। भवेदिष्टफलं तस्य तत्फलं जायते ध्रुवम्। स्पृष्टमात्रेण वा सद्यः सचेलं जलमाविशेत्। पञ्चगव्यप्राशनञ्च कुर्य्यादर्कावलोकनम्” दिवाकरः

**सरट्** पु० सृ-अटि। १वायौ २मेघे उणादिकोषः। ३सरघायां सिद्धान्तकौमुदी। ४कृकलासे अमरटीका।

**सरटि** पु० सृ-अटिन्। १वायौ २मेघे च उणादि०।

**सरटु** पु० सृ-अटु। कृकलासे उणादिकोषः।

**सरण** न० सृ-ल्युट्। १गमने २लोहमले हेमच०। (गन्धभादाल) ३लतायां स्त्री अमरः टाप्। ४त्रिवृतायां शब्दमा०।

**सरणि(णी)** स्त्री सृ-अनि वा ङीप्। १पथि २पङ्क्तौ मेदि० ३प्रसारण्यां भरतः। ४त्रिवृतायां स्त्री शब्दमा०।

**सरण्ड** पु० सृ-अण्डच्। १खगे २कामुके शब्दच० ३धूर्त्ते ४सरटे ५भूषणभेदे मेदि० सर्वत्र जातौ स्त्रियां ङीष्।

**सरण्यु** सृ-अन्यु। १वायौ २मेघे ३जले शब्दर० ४वसन्ते ५अग्नौ उणादिकोषः। [नि० शब्दमाला।

**सरत्** त्रि० सृ-शतृ। १गन्तरि स्त्रियां ङीप् सरन्ती। २सूत्रे

**सरलि** पु० सह रलिना। रलिशब्दार्थे अमरटीका।

**सरपत्रिका** स्त्री सरे जले पत्रमस्याः ठन्। १पद्मपत्रे २पद्मे च शब्दच०।

**सरमा** स्त्री सह रमते रम-अच्। १कुक्कुरयोषिति २देवशुन्यां ३राक्षसीभेदे विभीषणपत्न्याञ्च मेदि०। ४कश्यपपार्षिकन्याभेदे “गोलाङ्गूलस्तकोरस्य स्त्र्योन्यापत्यं तथैव च। अपत्यं सरमायाश्च गणो वै अमरादयः” वह्निपु०।

**सरयु** पु० सृ-अयु। १वायौ त्रिका०। उङ्। २अयोध्यान्तिकवाहिनदीभेदे स्त्री। तदुत्पत्तिः कालिकापु० २२अ० यथा “एवं विवाह्य विधिवत् सौवर्णे मानसाचले। तत्र यत् पतितं तोयं मानसाचलकन्दरे। तत्तोयं सप्तधा भूत्वा मानसाचलकन्दरात्। हेमाद्रेः कन्दरे सानौ सरस्याञ्च पृथक् पृथक्” इत्युपक्रमे “तेनाभूत् सरयूनाम्नी नदी पुण्यतमा शुभा”। तस्यां भवः अण् नि०। सारव तत्र भवे त्रि० अमरः।

**सरल** पु० सृ-अलच्। १पीतशाले अमरः “सरलो मधुकस्तिक्तः कटुपाकरसो लघुः। स्निग्धोष्णः कर्णकण्ठाक्षिरोगरक्षोहरः स्मृतः। कफानिलस्वेदयूकाकामलाक्षिव्रणापहः” भावप्र० तद्गुणोक्तिः। २धूपकाष्ठभेदे शब्दर० ३उदारे ४ऋजौ च त्रि० मेदि० ५त्रिपुटायां स्त्री अमरः

**सरलद्रव** पु० ६त०। सरलवृक्षनिर्यासे (टारपीन) अमरः।

**सरलाङ्ग** पु० सरलौ दृश्योऽङ्गं साधनं यस्य। श्रीवेष्टे गन्धद्रव्ये राजनि०।

**सरस्** न० सृ-असुन्। १जले रुद्रः। २सरोवरे अमरः। गौरा० ङीष्। ३सरसोऽल्पत्वे स्त्री अमरः “सरसीः परिशीलितुं मया” नैषधम्।